# Shri Kartikeya Ashtottarashatanama Stotram

# श्रीकार्तिकेयाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Shri Kartikeya Ashtottarashatanama Stotram

File name : kArtikeyAShTottarashatanAmastotram.itx

Category : subrahmanya, aShTottarashatanAma

Location : doc_subrahmanya

Transliterated by : Karthik Raman karthik.raman at gmail.com

Proofread by : Karthik Raman karthik.raman at gmail.com

Description/comments : skandamahApurANa mAheshvarakhaNDa kumArikAkhaNDa

Latest update : May 26, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 26, 2020

*sanskritdocuments.org*

# श्रीकार्तिकेयाष्टोत्तरशतनामस्तोत्रम्

ध्यानम् -
सिन्दूरारुणकान्तिमिन्दुवदनं केयूरहारादिभिः
दिव्यैराभरणैर्विभूषिततनुं स्वर्गस्य सौख्यप्रदम् ।
अम्भोजाभयशक्तिकुक्कुटधरं रक्ताङ्गरागांशुकं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतम् ॥

अथ स्तोत्रम् ।
विश्वामित्रस्तु भगवान् कुमारं शरणं गतः ।
स्तवं दिव्यं संप्रचक्रे महासेनस्य चापि सः ॥ १॥

अष्टोत्तरशतनाम्नां शृणु त्वं तानि फाल्गुन ।
जपेन येषां पापानि यान्ति ज्ञानमवाप्नुयात् ॥ २॥

त्वं ब्रह्मवादी त्वं ब्रह्मा ब्रह्मब्राह्मणवत्सलः ।
ब्रह्मण्यो ब्रह्मदेवश्च ब्रह्मदो ब्रह्मसङ्ग्रहः ॥ ३॥

त्वं परं परमं तेजो मङ्गलानां च मङ्गलम् ।
अप्रमेयगुणश्चैव मन्त्राणां मन्त्रगो भवान् ॥ ४॥

त्वं सावित्रीमयो देवः सर्वत्रैवापराजितः ।
मन्त्रः सर्वात्मको देवः षडक्षरवतां वरः ॥ ५॥

गवां पुत्रः सुरारिघ्नः सम्भवो भवभावनः ।
पिनाकी शत्रुहा चैव कूटः स्कन्दः सुराग्रणीः ॥ ६॥

द्वादशो भूर्भुवो भावी भुवःपुत्रो नमस्कृतः ।
नागराजः सुधर्मात्मा नाकपृष्ठः सनातनः ॥ ७॥

हेमगर्भो महागर्भो जयश्च विजयेश्वरः ।
त्वं कर्ता त्वं विधाता च नित्योऽनित्योऽरिमर्दनः ॥ ८॥

महासेनो महातेजा वीरसेनश्चमूपतिः ।
सुरसेनः सुराध्यक्षो भीमसेनो निरामयः ॥ ९॥

शौरिर्यदुर्महातेजा वीर्यवान् सत्यविक्रमः ।
तेजोगर्भोऽसुररिपुः सुरमूर्तिः सुरोर्जितः ॥ १०॥

कृतज्ञो वरदः सत्यः शरण्यः साधुवत्सलः ।
सुव्रतः सूर्यसङ्काशो वह्निगर्भो रणोत्सुकः ॥ ११॥

पिप्पली शीघ्रगो रौद्रिर्गाङ्गेयो रिपुदारणः ।
कार्तिकेयः प्रभुः क्षान्तो नीलदंष्ट्रो महामनाः ॥ १२॥

निग्रहो निग्रहाणां च नेता त्वं दैत्यसूदनः ।
प्रग्रहः परमानन्दः क्रोधघ्नस्तारकोऽच्छिदः ॥ १३॥

कुक्कुटी बहुलो वादी कामदो भूरिवर्धनः ।
अमोघोऽमृतदो ह्यग्निः शत्रुघ्नः सर्वबोधनः ॥ १४॥

अनघो ह्यमरः श्रीमानुन्नतो ह्यग्निसम्भवः ।
पिशाचराजः सूर्याभः शिवात्मा त्वं सनातनः ॥ १५॥

एवं स सर्वभूतानां संस्तुतः परमेश्वरः ।
नाम्नामष्टशतेनायं विश्वामित्रमहर्षिणा ॥ १६॥

प्रसन्नमूर्तिराहेदं मुनीन्द्र व्रियतामिति ।
मम त्वया द्विजश्रेष्ठ स्तुतिरेषा विनिर्मिता ॥ १७॥

भविष्यति मनोभीष्टप्राप्तये प्राणिनां भुवि ।
विवर्धते कुले लक्ष्मीस्तस्य यः प्रपठेदिमम् ॥ १८॥

न राक्षसाः पिशाचा वा न भूतानि न चाऽऽपदः ।
विघ्नकारीणि तद्गेहे यत्रैवं संस्तुवन्ति माम् ॥ १९॥

दुःस्वप्नं न च पश्येत्स बद्धो मुच्येत बन्धनात् ।
स्तवस्यास्य प्रभावेण दिव्यभावः पुमान्भवेत् ॥ २०॥

॥ इति श्रीस्कन्दमहापुराणे माहेश्वरखण्डान्तर्गते
कुमारिकाखण्डे श्रीकार्तिकेयाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Karthik Raman

*Shri Kartikeya Ashtottarashatanama Stotram*

pdf was typeset on March 26, 2020

Please send corrections to *sanskrit@cheerful.com*